योगवासिष्ठः/प्रकरणम् २ (मुमुक्षुव्यवहारप्रकरणम्)/सर्गः ०३

तृतीयः सर्गः ३

श्रीवसिष्ठ उवाच ।

पूर्वमुक्तं भगवता यज्ज्ञानं पद्मजन्मना ।

सर्गादौ लोकशान्त्यर्थं तदिदं कथयाम्यहम् ।। १

श्रीराम उवाच ।

कथयिष्यसि विस्तीर्णा भगवन्मोक्षसंहिताम् ।

इमं तावत्क्षणं जातं संशयं मे निवारय ।। २

पिता शुकस्य सर्वज्ञो गुरुर्व्यासो महामतिः ।

विदेहमुक्तो न कथं कथं मुक्तः सुतोऽस्य सः ।। ३

श्रीवसिष्ठ उवाच ।

परमार्कप्रकाशान्तस्त्रिजगत्त्रसरेणवः ।

उत्पत्योत्पत्य लीना ये न संख्यामुपयान्ति ते ।। ४

वर्तमानाश्च याः सन्ति त्रैलोक्यगणकोटयः ।

शक्यन्ते ताश्च संख्यातुं नैव काश्चन केनचित् ।। ५

भविष्यन्ति पराम्भोधौ जन्तसर्गतरङ्गकाः ।तांश्च वै परिसंख्यातुं सा कथैव न विद्यते ।। ६

श्रीराम उवाच ।

या भूता या भविष्यन्त्यो जगत्सर्गपरम्पराः ।

तासां विचारणा युक्ता वर्तमानास्तु का इव ।। ७

श्रीवसिष्ठ उवाच ।

तिर्यक्पुरुषदेवादेर्यो नाम स विनश्यति ।

यस्मिन्नेव प्रदेशेऽसौ तदैवेदं प्रपश्यति ।। ८

आतिवाहिकनाम्नान्तः स्वहृद्येव जगत्त्रयम् ।

व्योम्नि चित्तशरीरेण व्योमात्मानुभवत्यजः ।। ९

एवं मृता म्रियन्ते च मरिष्यन्ति च कोटयः ।

भूतानां यां जगन्त्याशामुदितानि पृथक्पृथक् ।। १०

संकल्पनिर्माणमिव मनोराज्यविलासवत् ।

इन्द्रजालामाल इव कथार्थप्रतिभासवत् ।। ११

दुर्वातभूकम्प इव त्रस्तबालपिशाचवत् ।

मुक्तालीवामले व्योम्नि नौस्पन्दतरुयानवत् ।। १२

स्वप्नसंवित्तिषुरवत्स्मृतिजातखपुष्पवत् ।

जगत्संसरणं स्वान्तर्मृतोऽनुभवति स्वयम् ।। १३

तत्रातिपरिणामेन तदेव घनतां गतम् ।

इहलोकोऽयमित्येव जीवाकाशे विजृम्भते ।। १४

पुनस्तत्रैव जग्नेद्वामरणाद्यनुभूतिमान् ।

परं लोकं कल्पयति मृतस्तत्र तथा पुनः ।। १५

तदन्तरन्ये पुरुषास्तेवामन्तस्तथेतरे ।

संसार इति भान्तीमे कदलीदलपीठवत् ।। १६

न पृम्ब्यादिमहाभूतगणा न च जगत्क्रमाः ।

मृतानां सन्ति तत्रापि तथाप्येषां जगद्भ्रमाः ।। १७

अविद्यैव ह्यनन्तेयं नानाप्रसरशालिनी ।

जडानां सरिदादीर्घा तरत्सर्गतरङ्गिणी ।। १८

परमार्थाम्बुधौ स्फारे राम सर्गतरङ्गकाः ।

भूयोभूयोऽनुवर्तन्ते त एवान्ये च भूरिशः ।। १९

सर्वतः सदृशाः केचित्कुलक्रममनोगुणेः ।

केचिदर्धेन सदृशाः केचिच्चातिविलक्षणाः ।। २०

इमं व्यासङ्ग तत्र द्वात्रिंशं संस्मराम्यहम् ।

यथासंभवविज्ञानदृशा संलश्यमानया ।। २१

द्वादशाल्पधियस्तत्र कुलाकारेहितैः समाः ।

दश सर्वे समाकाराः शिष्टाः कुलविलक्षणाः ।। २२

अद्यपयन्ये भविष्यन्ति व्यासवाल्मीकयस्तथा ।

भृग्वङ्गिरःपुलस्त्याश्च तथैवाप्यन्यथैव च ।। २३

नराः सुरर्षिदेवानां गणाः संभूय भूरिशः ।

उत्पद्यन्ते विलीयन्ते कदाचिच्च पृथक्पृथक् ।। २४

ब्राह्मी द्वासप्ततिस्त्रैता आसीदस्ति भविष्यति ।

स एवान्यश्च लोकाश्च त्वं चाहं चेति वेदयहम्।।२५

क्रमेणास्य मुनेरित्थं व्यासस्याद्भुतकर्मणः ।

संलक्ष्यतेऽवतारोऽयं दशमो दीर्घदर्शिनः ।। २६

अभूम व्यासवाल्मीकियुक्ता वयमनेकशः ।

अभूम वयमेवेमे बहुशश्च पृथक्पृथक् ।। २७

अभूम् वयमेवेमे सदृशा इतरे विदः ।

अभूम वयमेवेमे नानाकारा समाशयाऽ ।। २८

भाव्यमद्याप्यनेनेह ननु वाराष्टकं पुनः ।

भूयोऽपि भारतं नाम सेतिहासं करिष्यति ।। २९

कृत्वा वेदविभागं च नीत्वानेन कुलप्रथाम् ।

ब्रह्मत्वं च तथा कृत्वा भाव्यं वैदेहमोक्षणम् ।। ३०

वीतशोकभयः शान्तनिर्वाणो गतकल्पनः ।

जीवन्मुक्तो जितमना व्यासोऽयमिति वर्णितः ।। ३१

वित्तक्तधुवयःकर्मविद्याविज्ञानचेष्टितैः ।

समानि सन्ति भूतानि कदाचिन्नतु तानि तु ।। ३२

क्वचित्सर्गशतैस्तानि भवन्ति न भवन्ति वा ।

कदाचिदपि मायेयमित्थमन्तविवर्जिता ।। ३३

यच्छतीयं विपर्यासं भूरिभूतपरम्परा ।

बीजराशिरिवाजस्रं पूर्यमाणः पुनःपुनः ।। ३४

तेनैव संनिवेशेन तथान्येन पुनःपुनः ।

सर्गाकाराः प्रवर्तन्ते तरङ्गाः कालवारिधेः ।। ३५

आश्वस्तान्तःकरणः

शान्तविकल्पः स्वरूपसारमयः ।

परमशमामृततृप्त-

स्तिष्ठति विद्वान्निरावरणः ।। ३६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मुमुक्षुव्यवहारप्रकरणे भूयोभूयःसर्गानुवर्णनं नाम तृतीयः सर्गः ।। ३ ।।